श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीनृसिंहमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sriman N. Ananthanarayana of Chennai for making this text available.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंहमङ्गळम् ॥

घटिकाचल शृङ्गाग्र विमानोदर वासिने।
निखिलामर सेव्याय नरसिंहाय मङ्गळम्॥ १ ॥

उदीचीरङ्ग निवसत्सुमनस्तोम सूक्तिभिः।
नित्याभिवृद्ध यशसे नरसिंहाय मङ्गळम्॥ २ ॥

सुधावल्ली परिष्वङ्ग सुरभीकृत वक्षसे।
घटिकाद्रि निवासाय श्रीनृसिंहाय मङ्गळम्॥ ३ ॥

सर्वारिष्ट विनाशाय सर्वेष्ट फलदायिने।
घटिकाद्रि निवासाय श्रीनृसिंहाय मङ्गळम्॥ ४ ॥

महागुरु मनः पद्म मध्य नित्य निवासिने।
भक्तोचिताय भवतात् मङ्गळं शाश्वतीः समाः॥ ५ ॥

श्रीमत्यै विष्णुचित्तार्य मनोनन्दन हेतवे।
नन्दनन्दन सुन्दर्यै गोदायै नित्यमङ्गळम्॥ ६ ॥

श्रीमन्महाभूतपुरे श्रीमत्केशव यज्वनः।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गळम्॥ ७ ॥

पादुके यतिराजस्य कथयन्ति यदाख्यया।
तस्य दाशरथेः पादौ शिरसा धारयाम्यहम्॥ ८ ॥

श्रीमते रम्यजामातृ मुनीन्द्राय महात्मने।
श्रीरङ्गवासिने भूयात् नित्यश्रीः नित्यमङ्गळम्॥ ९ ॥

सौम्यजमातृ योगीन्द्र चरणाम्बुज षट्पदम्।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम्॥ १० ॥

वाधूल श्रीनिवासार्य तनयं विनयाधिकम्।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम्॥ ११ ॥

चण्डमारुत वेदान्तविजयादि स्वसूक्तिभिः।
वेदान्त रक्षकायास्तु महाचार्याय मङ्गळम्॥ १२ ॥

॥ इति श्रीनृसिंहमङ्गळं समाप्तम्॥